श्री पञ्चायुध स्तोत्रम्

स्फुरत् सहस्रार शिखाति तीव्रम्
सुदर्शनं भास्कर कोटि तुल्यम् ।
सुरद्विषां प्राणविनाशि विष्णोः
चक्रं सधाऽहम् शरणं प्रबद्ये ॥१

विष्णोर् मुखोत्थानिल पूरितस्य
यस्य ध्वनिर् दानव दर्पहन्ता ।
तं पाञ्चजन्यं शशि कोटि सुभ्रम्
शङ्खं सदाऽहम् शरणम् प्रबद्ये ॥२

हिरण्मयीं मेरु समान सारां
कौमोदकीं दैत्य कुलैक हन्त्रीं ।
वैकुण्ठ वामाग्र कराभि मृष्टाम्
गदां सदाऽहम् शरणं प्रबद्ये ॥३

रक्षोसुराणां कठिनोग्र कण्ठच्
छेदक्षरच् छोणित दिग्धधारम् ।
तं नन्दकं नाम हरेः प्रदीप्तं

खड्गं सदाऽहम् शरणं प्रपद्ये ॥४

यज् यानिनाद श्रवणात् सुराणां
चेतांसि निर्मुक्त भयानि सद्यः ।
भवन्ति दैत्याशनि बाणवर्षी
शार्ङ्गं सदाऽहम् शरणं प्रपद्ये ॥५

इमं हरेः पञ्चमहायुधानां
स्तवं पठोद्योऽनुदिनं प्रभाते ।
समस्त दुःखानि भयानि सद्यः
पापानि नश्यन्ति सुखानि सन्ति ॥६

वने रणे शत्रु जलाग्नि मध्ये
यदृच्छया पत्सु महाभयेषु ।
इदं पठन् स्तोत्रं अनाकुलात्मा
सुखी भवेत् तत् कृत सर्व रक्षः ॥७